योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०५९

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

सरस्वती तथेत्युक्त्वा तत्रैवान्तर्धिमाययौ ।

प्रभाते पङ्कजैः सार्धं बुबुधे सकलो जनः ।। १

आलिलिङ्ग च तां लीलां लीला च दयितं क्रमात् ।

पुनःपुनर्महानन्दान्मृतं प्रोज्जीवितं पुनः ।। २

तदासीद्राजसदनं मदमन्मथमन्थरम् ।

आनन्दमत्तजनतं वाद्यगेयरवाकुलम् ।। ३

जयमङ्गलपुण्याहघोषघुंघुमघर्घरम् ।

तुष्टपुष्टजनापूर्णं राजलोकवृताङ्गणम् ।। ४

सिद्धविद्याधरोन्मुक्तपुष्पवर्षसहस्रभृत् ।

ध्वनन्मृदङ्गमुरजकाहलाशङ्खदुन्दुभि ।। ५

ऊर्ध्वीकृतबृहद्धस्तहास्तिकस्तनितोत्कटम् ।

उत्तालताण्डवस्त्रैणपूर्णाङ्गणलसद्ध्वनि ।। ६

मिथःसंघट्टनिपतज्जनोपायनदन्तुरम् ।

पुष्पशेखरसंभारमयसंसारसुन्दरम् ।। ७

विकीर्णापादितक्षौमं मन्त्रिसामन्तनागरैः ।

स्थूलपद्ममयं व्योम रक्तैस्ताण्डविनीकरैः ।। ८

मत्तस्त्रीकन्धरावृत्तलीलान्दोलितकुण्डलम् ।

प्रवृत्तपादसंपातप्रोल्लसत्पुष्पकर्दमम् ।। ९

पट्टवासःशरन्मेघवितानकवितानकम् ।

वराङ्गनामुखैर्नृत्यच्चन्द्रलक्षगृहाजिरम् ।। १०

परलोकादुपानीता राज्ञी सा पतिरेव च ।

इति निर्वृत्तगाथाभिर्जगुर्देशान्तरे जनाः ।। ११

पद्मो भूमिपतिः श्रुत्वा वृत्तान्तं कथितं मनाक् ।

चक्रे स्नानं समानीतैश्चतुःसागरवारिभिः ।। १२

ततोऽभिषिषिचुर्विप्रा मन्त्रिणो भूभुजश्च तम् ।

लब्धोदयमनन्तेहममरेन्द्रमिवामराः ।। १३

लीला लीला च राजा च जीवन्मुक्तमहाधियः ।

रेमिरे पूर्ववृत्तान्तकथनैः सुरतैरिव ।। १४

सरस्वत्याः प्रसादेन स्वपौरुषकृतेन तत् ।

प्राप्तं लोकत्रयश्रेयः पद्मेनेति महीभुजा ।। १५

स ज्ञप्तिज्ञानसंबुद्धो राजा लीलाद्वयान्वितः ।

चक्रे वर्षायुतान्यष्टौ तत्र राज्यमनिन्दितः ।। १६

जीवन्मुक्तास्त इत्येवं राज्यं वर्षायुताष्टकम् ।

कृत्वा विदेहमुक्तत्वमासेदुः सिद्धसंविदः ।। १७

यदुदयविशदं विदग्धमुग्धं

समुचितमात्महितं च पेशलं च ।

तदखिलजनतोषदं स्वराज्यं

चिरमनुपाल्य सुदंपती विमुक्तौ ।। १८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये लीलोपाख्याने पद्मनिर्वाणं नामैकोनषष्टितमः सर्गः ।। ५९ ।।